Postal Regd.No. GAMC- 1553/2019-2021

ISSN 2454-6313

संस्कृत-

# साम्प्रतम्

(Sampratam means "Current")

(संस्कृतमासिकीपत्रिका)
वर्ष : १४ अङ्क : १६७
अेप्रिल - २०२०

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2019-2021 issued by SSP Ahmedabad. Valid upto 31-12-2021. containing 8 pages ₹10

## चिन्तनम्

सतीशः गज्जर्

### तुलाधिरूढं जगत्सर्वम्

सम्प्रति अहं नगरपालिकाभवने करवस्त्रेण प्रस्वेदम् अपाकुर्वन् उपविष्टः अस्मि। मस्तके त्रिपक्षं व्यजनं यथाशक्ति भ्रमति। परन्तु पवनस्य स्पर्शः नास्ति। व्यजनस्य परिश्रमः न्यूनः नास्ति। किन्तु तेन किम्? एवं दीर्घायुः सदपि व्यजनं विद्युद्रक्षणाय एव जीवति। शतं वर्षाणि जीवन् अपि मनुष्यः वस्तुतः कियत् 'जीवति' इति आकलयितुं न शक्यते। जीवनस्य प्रमाणं श्वसनमात्रं नास्ति। जीवनं तोलयितुं सम्प्रति कालः एव प्रमाणं वर्तते। तत् वास्तवं प्रमाणं नास्ति। चिरञ्जीवः मनुष्यः अपि कानिचन क्षणानि एव जीवति। चित्रकर्मणि तत्परस्य चित्रकारस्य जीवनं तत्समये किञ्चित् उन्नतं भवति। रचनायां निमग्नचित्तः कविः कानिचन क्षणानि जीवति। तत्परान् छात्रान् अध्यापयन् कर्मठः शिक्षकः पाठनावधिं विस्मृत्य जीवनामृतं पिबति। प्रियक्रीडनकैः क्रीडन् शिशुः अपि योगस्य संस्थितिं लभते।

सङ्केतस्थाने मिलितान् स्निग्धजनान् घटीयन्त्रं नितरां बाधते। तस्य उपेक्षां तु कश्चित् व्यवहारकुशलः मनुष्यः एव कर्तुम् अर्हति। 'टाइटेनिक' चलचित्रे जलयानस्य मुखे स्थितं स्निग्धं युगलं कञ्चित् कालं जीवनस्य अर्कं स्वदते। जीवने क्वचित् महार्हाणि मुक्तानि क्षणानि लभ्यन्ते। तदानीं मनुष्यः वस्तुतः जीवति।

मनुष्यः प्राचीनकालात् तुलाप्रियः वर्तते। सद्योजातं शिशुं वैद्यः तोलयति। कन्यायाः तुलनं शुल्केन भवति। वरस्य तुलनं भविष्यकालस्य आजीविकया क्रियते। वेतनेन वयं पदं तोलयामः। छात्रं तोलयितुं गुणाङ्कपत्रम् एव अन्तिमं साधनं वर्तते। अस्माकं समाजे उच्चस्तरीयः कर्मचारी अनायासेन बुद्धिमान् भवति। यदा ज्ञानस्य तुलना पदेन क्रियते तदा एरण्डाः द्रुमायन्ते। मूर्खशिरोमणिः अपि लोकमतेन पाण्डित्यं प्राप्तुम् अर्हति इति लोकशासनस्य वरदानम् अस्ति। परन्तु राज्यच्युतस्य तस्य सः ज्ञानराशिः क्षणार्धेन उत्करः भवति। ततः चुम्बकत्ववञ्चितस्य लौहखण्डस्य वचनं तुच्छा सूचिः अपि न शृणोति। सः सुवर्णमयं भूतकालं संस्मरन् शेषं जीवनं यापयति।

## गृहपरिसरे प्रीतिः

अन्नपूर्णा षष्टिवर्षीया वृद्धा। एतस्मिन् पश्चिमे वयसि तया पतिवियोगः प्राप्तः। एतदनन्तरं कानिचन दिनानि तस्याः गृहं प्रति बन्धूनां गमनागमनं प्रवृत्तम्। अतः अन्नपूर्णया विशेषतः नीरसता न अनुभूता तदा। किन्तु बान्धवानां गमनागमनं यदा न्यूनं जातं तदा कष्टम् अनुभूतम्।

तस्याः पुत्री जामाता च नगरे वसतः स्म। जामातुः तु वाणिज्यं वृत्तिः। अतः जामातृपुत्र्योः आगमनम् अपि विरलतया एव भवति स्म। तस्मात् एकाकिता विशेषतः बाधते स्म अन्नपूर्णाम्।

कदाचित् गृहकार्याणि समाप्य सा गृहात् बहिः वृक्षस्य अधः कटं प्रसार्य शयनं कृतवती आसीत्। तदवसरे कश्चन मयूरः अकस्मात् तत्र उपस्थितः। अन्नपूर्णा मयूरम् अपश्यत्। मयूरस्य पादे व्रणः दृष्टः तया। कोऽपि एतं मारयितुं प्रयासं कृतवान् स्यात् इति सा अवगतवती। अतः सा झटिति उत्थाय मयूरं गृहस्य अन्तः नीत्वा वस्त्रपट्टिकया तस्य व्रणस्थलं बद्धवती।

अत्रान्तरे कश्चित् गृहस्य पुरतः स्थित्वा उच्चस्वरेण अपृच्छत् – "आर्ये! किम् अत्र कोऽपि मयूरः आगतः? किं सः दृष्टः भवत्या?" इति।

गृहात् बहिः आगत्य अन्नपूर्णा अवदत् – "न खलु कोऽपि मयूरः दृष्टः मया! अत्र कुतः आगच्छेत् मयूरः?" इति। सः मनुष्यः अग्रे किमपि अवदन् ततः निर्गतवान्। अन्नपूर्णा ततः प्रतिदिनम् अपि मयूरस्य पादस्य व्रणस्य चिकित्सां कृतवती। समये आहारं यच्छन्ती सा तं पुत्रवत् प्रीत्या पालितवती। तस्मात् सन्तुष्टः मयूरः तत्रैव अवसत्। कदाचित् सः पिञ्छं प्रसार्य नृत्यति स्म अपि।

एतां वार्तां ज्ञातवान् भूस्वामी कदाचित् अन्नपूर्णायाः गृहम् आगत्य अवदत् – "आर्ये! कश्चन मयूरः पालनीयः इति ममापि महती इच्छा। महता प्रयत्नेनापि मया कोऽपि मयूरः न प्राप्तः। मया श्रुतं यत् भवत्या गृहे कश्चन मयूरः पालितः इति। कृपया एतं भवती मह्यं ददातु। अहं भवत्यै प्रभूतानि सुवर्णनाणकानि दास्यामि" इति।

एतत् श्रुत्वा अन्नपूर्णा उक्तवती – "किम् एतत् उच्यते भवता भूस्वामिवर्य! एषः मयूरः मम पुत्रः इव। एतं विना न अहं जीवितुम् अर्हामि, न वा मां विना एषः जीवितुम् अर्हति। अतः एतस्य मयूरस्य दानस्य प्रस्तावः सर्वथा दूरापास्तः" इति।

"भवतु नाम" इति उक्त्वा गतः भूस्वामी सप्ताहचतुष्टयस्य अनन्तरं पुनः आगत्य अवदत् – "आर्ये! भवती एकाकिनी अत्र वसति। यदा भवती अन्यत्र गच्छेत् तदा एतं को वा पालयेत्? मम गृहे यदि एषः भवेत् तर्हि न एषा समस्या उद्भवेत्। यतः मम गृहे बहवः जनाः भवन्ति" इति।

अन्नपूर्णा क्षणकालं विचिन्त्य अवदत् – "बान्धवानां गृहं गन्तव्यम् इति ममापि इच्छा भवति स्म कदाचित्। किन्तु इदानीं तु मयूरस्य सहवासतः तादृशी इच्छा विलुप्ता एव अस्ति। अतः अन्यत्र गतं चेत् एतस्य मयूरस्य का गतिः भवेत् इति समस्या एव न उद्भवति" इति।

तस्याः मयूरप्रीतिः भूस्वामिनि आश्चर्यम् अजनयत्। सः तां पुनः अवदत् – "एवं तर्हि मयूरः भवती च मम गृहे वसताम्। तदा मया भवत्या चापि मयूरसहवासः प्राप्यते। यदा इच्छा भवति तदा भवती अत्र प्रत्यागन्तुम् अर्हति एव" इति।

भूस्वामिन: निमन्त्रणं तस्यां किञ्चित् आशाम् अजनयत् । अनन्तरक्षणे एव तया स्वस्य गृहं, गृहपरिसर:, तत्रत्या: तरुलतादय:, परिसरस्य शान्तता इत्यादय: स्मृता: । अत: सा भूस्वामिनं किमपि न उक्तवती एव।

तदा भूस्वामी पुन: अवदत् – ''मम गृहं प्रति आगतं चेत् भवत्या: योगक्षेमव्यवस्था उत्तमा भवेत् । भवत्या: स्वातन्त्र्यस्यापि च्युति: न भविष्यति तत्र। भवत्या: गृहस्य रक्षणादिकार्यम् अहं ग्रामाधिकारिणे समर्पयिष्यामि। इत: य: आय: भवेत् तमपि स: भवत्यै एव दास्यति'' इति।

''एते सर्वे अंशा: युक्ता: एव सन्ति। तथापि...'' इति अर्धोक्त्या कथनं स्थगितवती वृद्धा।

''भवती किमपि वक्तुम् इच्छति इति भाति। निस्सङ्कोचं वदतु तावत्'' इति अवदत् भूस्वामी।

''किम् अभिप्रायस्य गोपनेन ? प्रतिदिनं भोजनं कृत्वा अहं वृक्षस्य अध: कटं प्रसार्य स्वपिमि । तदा पर्णानां सञ्चारात् य: मर्मरध्वनि: श्रूयते स: किम् अन्यत्र लभ्येत ? अत्र या शब्दै: वर्णयितुम् अशक्या परमा शान्ति: प्राप्यते किं सा इतरत्र प्राप्येत ?'' इति अवदत् वृद्धा।

एतत् श्रुत्वा भूस्वामी अवदत् – ''एतस्मिन् गृहे परिसरे च भवत्या: प्रीति: अपूर्वा । अत: अन्यत्र भवत्या: नयनम् अनुचितं स्यात् । अत्र हरिन्मयता वर्धताम् । तदर्थम् अहं वृक्षादीनां वर्धनाय व्यवस्थां करिष्यामि । मयूरस्य दर्शनस्य इच्छा यदा प्रबला भवति तदा अहमेव अत्र आगमिष्यामि। भवती अत्रैव वसतु'' इति।

तत: भूस्वामी तत्र विविधानां वृक्षाणाम् आरोपणस्य व्यवस्थां कृतवान् । तस्मात् तत्र एकं वनं निर्मितं जातम्।

अथ कदाचित् अन्नपूर्णा धान्यै: बीजपूरणेन च युक्तां स्थालिकां मयूरस्य पुरत: प्रीत्या स्थापयित्वा यावत् प्रतिगन्तुम् उद्युक्ता तावता तया कश्चन स्वर: श्रुत: – ''अम्ब ! मया अन्नं शाक: च इष्यते'' इति।

अन्नपूर्णा परिवृत्य दृष्टवती। तत्र मन्दहासपूर्वकं स्थित: दशवर्षीय: बाल: तया दृष्ट: । तस्य दर्शनात् तया महत् आश्चर्यम् अनुभूतम्। क्षणकालानन्तरं तत्र कुत्रापि मयूरम् अदृष्ट्वा सा कोपमिश्रितेन स्वरेण अपृच्छत् – ''अये बालक! मम मयूर: क्व ? तस्य का गति: जाता ? स: मम पुत्र: इव इति किं भवान् जानाति ?'' इति।

तदा बालक: हसन् – ''अहम् एव भवत्या पालित: स: पुत्र: । भवत्या: प्रेम्ण: अनुकम्पस्य च कारणत: मया मुनिशापात् प्राप्तात् मयूरजन्मत: मुक्ति: प्राप्ता । अत्र प्रमाणं – मम पादे दृश्यमान: व्रणकिण:, यत्र च भवत्या वस्त्रपट्टिका बद्धा आसीत्'' इति वदन् पादस्थं व्रणकिणम् अदर्शयत्।

तस्य दर्शनात् वृद्धा अवगतवती यत् अयं बाल: सत्यम् एव वदति इति । सा तं बालं स्वसमीपम् आकृष्य प्रीत्या आलिङ्ग्य अवदत् – ''वत्स ! मुनय: शापदाने अनुग्रहे च समर्था: भवन्ति इति बाल्ये मया श्रुतम् आसीत्। क: मुनि: भवते शापं दत्तवान् ?'' इति।

''अम्ब ! सा च काचित् दीर्घा कथा। महती बुभुक्षा बाधते माम्। अत: तां संक्षेपेण वदामि। मम मातापितरौ कौ इति अहं न जानामि। भूपाल: नाम कश्चन कृषिक: मां पोषितवान्। अन्यै: बालै: सह अहं गोचारणाय ग्रामात् बहि: गच्छामि स्म । तत्र विविधा: जन्तव: दृश्यन्ते स्म । अहं तु मयूरं विशेषत: इच्छामि स्म । कदाचित् कश्चन मयूर: दृष्ट: मया । स: ग्रहीतव्य: इति इच्छा मयि उत्पन्ना । किन्तु तस्य ग्रहणं सुकरं न आसीत् । तं लक्ष्यीकृत्य अहं पाषाणान्

(अनुसन्धानम् ७ पृष्ठे )

## शिवभक्ताः

✍ ओजसी सुखटणकरः

परमः भगवान् एकः एव। किन्तु स्वस्य सत्त्वानुसारं विविधाः मनुष्याः विविधान् देवान् भजन्ते। किञ्चित् निरीक्षणं क्रियते चेत्, मनुष्यस्य साधारणवर्तनशैलीं दृष्ट्वा, सः शिवभक्तः स्यात् वा कृष्णभक्तः, श्रीरामोपासकः स्यात् वा देव्योपासकः, इत्यादिकस्य तर्कम् अपि कर्तुं शक्यते। कथं करणीयः ईदृशः तर्कः ? एतत् तु अस्ति सरलम्। यं देवं सः मनुष्यः पूजयति, तस्य देवस्य कानिचन लक्षणानि तस्मिन् मनुष्ये अपि अवतरन्ति। उदाहरणार्थं, शिवस्य शान्तत्वं, कृष्णस्य उत्साहपूर्णं कार्यमधुरत्वं, श्रीरामस्य आदर्शतमव्यवहाराय महत्त्वदानं, कस्याश्चित्, देव्याः तत्तदगुणानुसारं प्राप्तं कोमलहृदयभावः, एतत् सर्वं भिन्नभिन्नत्वेन तत्तद्देवभक्तेषु दृश्यते।

एतेषु शिवभक्तान् पश्याम। तेषु वर्तमानम् आन्तरिकं बलम् अनन्यम् इव। स्वगृहे एव एकत्र शिवस्य मूर्तिं स्थापयित्वा, अथवा शिवमन्दिरं प्रविश्य, केचन शिवभक्ताः नियमिततया ध्यानं कुर्वन्ति। गच्छता कालेन, ध्यानस्य शान्तावस्थां प्रवेष्टुं तेषां सम्यक् अभ्यासः अपि भवति। शनैः शनैः तस्य परिणामः तेषां दैनन्दिनजीवने अपि प्रभवति, यतः दैनन्दिनं सामान्यं जीवनं जीवन्तः अपि ते अधिकाधिकं शान्तमनसः भवन्ति। प्रशान्तं मनः मनुष्याय सर्वदा आन्तरिकं बलं ददाति। अतः सहसा कदाचित् सङ्कटम् आपतति चेदपि, एते शिवभक्ताः आत्मानम् अनवसाद्यधृत्या सर्वं सोढुं शक्नुवन्ति। सङ्कटकाले तैः उपयुक्तं तत् आन्तरिकं बलं साक्षात् शिवात् एव आगच्छति।

सर्वे शिवभक्ताः आरम्भतः एव सबलाः भवन्ति इति न। नैके भक्ताः मनसा दुर्बलाः अपि भवन्ति। किन्तु तेषां दुर्बलत्वम् एव तान् शिवं प्रति आकृष्य नयति। ईदृशाः भक्ताः अपारश्रद्धया आन्तरिकबलप्राप्त्यर्थं शिवं याचन्ते, तपसा च ते तपन्ते। सम्प्राप्ते समये श्रद्धायाः, तपसश्च फलं तैः निश्चयेन प्राप्यते।

यदा कदा कस्यचित् भक्तस्य जीवने सङ्कटकालः दीर्घायते। परिस्थितेः काठिन्यम् असह्यम् अपि सम्भवेत। परन्तु तप शिवशरणं गतः भक्तः शिवचरणं न त्यजति। शान्त्या आन्तरिकबलस्य साहाय्येन सर्वं सहमानम् ईदृशं भक्तं दृष्ट्वा बहुवारं अन्यजनानां मनांसि करुणायन्ते किन्तु कठिनपरिस्थित्यां सत्याम् अपि देवभक्तयोः मध्ये प्रतिदिनं वर्धमानं सम्बन्धम् अन्यजनाः तु कथं जानीयुः ? यतः भक्त्याः माहात्म्यं भक्तेन एव ज्ञायते।

पुराणकाले समुद्रमथनसमये शिवः हलाहलं पीतवान् आसीत्। तस्मात् ते एव सर्वे देवाः अमृतं प्राप्तुं शक्तवन्तः। हलाहलपानेन शिवस्य कण्ठः नीलः सञ्जातः। तथापि सः लीलया आत्मवेदनां सोढवान्। अद्य तस्य भक्ताः तमेव शिवम् अनुसृत्य जीवनवेदनां सहन्ते। भक्तस्य जीवने भगवान् यदा कदा हेतुःपूर्वकं किञ्चन मथनम् कारयति। न तत् खलु बाह्यजीवनस्य, किन्तु तेन व्याजेन कारितं, तस्य भक्तस्य आन्तरिकचेतनायाः एव तत् मन्थनम्। यतः मन्थनेन एव भक्तस्य आन्तरिकशुद्धिः भवति। स्वभावदोषाः निर्गच्छन्ति। अध्यात्मथि प्रगतिः भवति। भक्तस्य उत्कर्षः सञ्जायते। तत्र शुभ्रस्वच्छदिव्यकैलासे पीतहलाहलः नीलकण्ठः यथा शोभते, तथा अत्र निजवेदनां पीत्वा आन्तरिकोत्कर्षं प्राप्तः शिवभक्तः अपि तावता एव सौन्दर्येण लसति। एतादृशाय भक्ताय शिवाय च अर्प्यते मयि स्फूरितम् एकं चिन्तनम्–

**पीत्वा हलाहलं तत्र शोभते नीलकण्ठः**
**सोढ्वा वेदनामत्र लभ्यते उत्कर्षः।**

# मासवार्ता

## संस्कृत-साहित्य-रसास्वाद-व्याख्यानमाला




संस्कृत-साहित्य-अकादमी, गान्धिनगरम् एवं च संस्कृतविद्याप्रतिष्ठानम्, अहमदाबाद इत्यनयोः संयुक्तोपक्रमेण आरब्धायाः संस्कृत-साहित्य-रसास्वाद-व्याख्यानमालायाः सप्तमं व्याख्यानं मार्चमासस्य १४ दिनाङ्के शनिवासरे 'अमदावाद-मेनेजमेन्ट-एसोशिएशन' इति स्थाने सम्पन्नम् । कार्यक्रमेऽस्मिन् डॉ. वसन्तकुमारः भट्टः (पूर्वनियामकः संस्कृतविभागाध्यक्षश्च भाषा-साहित्य-भवनम्, गुजरातविश्वविद्यालयः) "कालजयी - नाटकम् अभिज्ञानशाकुन्तलम्"इति विषये पू. भागवतऋषिः (न्यासी, भागवतसोलाविद्यापीठः) "भागवते सामाजिकक्रान्तिः" इति विषये च सुन्दरं व्याख्यानम् अकुरुताम् । उभयोः वक्त्रोः व्याख्यानं श्रुत्वा संस्कृतरसिकाः प्रसन्नाः आसन् । अत्र उल्लेखनीयं यत् प्रतिमासम् एकवारम् एतस्याः व्याख्यानमालायाः आयोजनं भवति।

## आरब्धाः Online संस्कृतपाठाः




कोरोनाविषाणोः प्रभावेण समग्रविश्वे सर्वाणि कार्याणि स्थगितानि सन्ति । भारतेऽपि एतस्य महान् प्रभावः दृश्यते । शैक्षिकसंस्थानानि अपि 'लॉकडाउन' कारणात् स्थगितानि सन्ति । एतादृशे कष्टकाले छात्राणाम् अध्ययनम् अवरुद्धं न भवेत् इति विचिन्त्य एकलव्य-संस्कृत-एकेडेमी-संस्थानेन संस्कृतस्य Online वर्गाः आरब्धाः सन्ति । एतया व्यवस्थया सन्तुष्टाः छात्राः पूर्ववदेव संस्कृतस्य अध्ययनं कुर्वन्तः सन्ति।

## कृपया हसन्तु

**रमण:** -(पितरम् उद्दिश्य) भो: पित: ! कृपया कारयानस्य कुञ्चिकां ददातु, अहं बहि: गन्तुम् इच्छामि ।

**पिता** -ईश्वरेण द्वौ पादौ दत्तौ स्त । तयो: उपयोगं कदा करिष्यसि ?

**रमण:** -एकस्य पादस्य उपयोगं एक्सीलेटरनिमित्तम् अपरस्य पादस्य प्रयोगं ब्रेकनिमित्तं च करिष्यामि ।

★ ★ ★ ★ ★

**नमन:** - सङ्गणकस्य जालपुटे 'गूगल' इत्यत्र किमपि नाम अन्वेषणाय लिखतु, तत् प्राप्यते एव ।

**रमण:** - तर्हि कृपया चम्पाबाई इति शीघ्रं लिखतु ।

**नमन:** - सा का अस्ति ?

**रमण:** - सा अस्माकं गृहस्य कर्मकरी अस्ति । यदा आरभ्य नगरे आतप: वर्धित: तदा आरभ्य सा न आगता एव । कदाचित् 'गूगल' इत्यत्र द्रष्टुं शक्नुयाम् ।

★ ★ ★ ★ ★

**रमण:** - (नमनम् उद्दिश्य) तव विवाहस्य किम् अभवत् ?

**नमन:** - प्राय: पञ्चाशत् प्रतिशतं सर्वं निश्चितं वर्तते ।

**रमण:** - तर्हि समस्या कुत्र अस्ति ?

**नमन:** - कन्यापक्षस्य उत्तरम् अवशिष्टम् अस्ति ।

## प्रहेलिका

– संस्कृतविकिपिडीयाजालस्थानात्

**एक चक्षुर्न काकोऽयं बिलमिच्छन्न पन्नग: ।**
**क्षीयते वर्धते चैव न समुद्रो न चन्द्रमा: ॥**

अस्य एकमेव नेत्रं विद्यते, किन्तु काक: न । बिलम् इच्छति, किन्तु न सर्प: । क्षयं गच्छति वृद्धिम् अपि गच्छति किन्तु समुद्र: अपि न चन्द्रमापि न।

**उत्तरम्** – सूत्रेण सहिता सूची

**का कान्ता कालियाराते: पुनरर्थे किमव्ययम् ।**
**किं वन्द्य सर्वदेवानां फलेषु किमु सुन्दरम् ॥**

विष्णो: पत्नी का ? (मा–लक्ष्मी:) 'पुन:' इत्यस्मिन् अर्थे उपयुज्यमानम् अव्ययं किम् ? ('तु') सर्वे देवा: कां देवतां वन्दन्ते ? (लिङ्गम्) सुन्दरं फलं किम् ? एकेन पदेन उत्तरतु। (बीजपूरफलम्)

**उत्तरम्** – मातुलिङ्गम्

**किमिच्छति नर: काश्यां ? भूपानां को रणे हित: ?**
**को वन्द्य: सर्वदेवानां ? दीयतामेकमुत्तरम् ॥**

मानव: काश्यां किं प्राप्तुम् इच्छति ? राज्ञां युद्धे किं हिताय भवति ? सर्वेषां देवानां वन्द्य: क: ? प्रश्नत्रयस्य अपि एकम् उत्तरं वदतु।

**उत्तरम्** – मृत्युञ्जय:

## गृहपरिसरे प्रीतिः

क्षिप्तवान् । मया एवं क्षिप्तः कश्चन शिलाखण्डः समीपे एव तपस्यतः कस्यचित् मुनेः उपरि पतितः । तस्मात् क्रुद्धः मुनिः अशपत् यत् भवान् मयूररूपतां प्राप्नोतु इति। मम प्रार्थनातः सः शापविमुक्तेः मार्गम् अपि असूचयत् – सर्वेषु जीविषु परिसरे च यस्य प्रीतिः अधिका तस्य सहायतः भवता शापात् विमुक्तिः प्राप्यते इति। इदानीं भवत्याः कारणतः मया शापविमुक्तिः प्राप्ता अस्ति'' इति।

अन्नपूर्णा महान्तं सन्तोषम् अनुभवन्ती तस्मै भोजनं परिवेषितवती । भोजनसमये सा अवदत् – ''वत्स ! एतस्य प्रदेशस्य भूस्वामी मयूरे विशेषप्रीतिमान् । सः भवन्तं स्वगृहे पालयितुम् इच्छति स्म । तस्य अनुग्रहात् एव मम गृहस्य परिसरः हरिन्मयः जातः अस्ति। विविधाः पशुपक्षिणः अत्र सन्ति तस्य कारणात् एव। किं भवान् तस्य किमपि साहाय्यं कर्तुं शक्नुयात् ?'' इति।

बालकः एतं प्रस्तावम् अङ्गीकुर्वन् अवदत् – ''अहं मयूररूपेण दीर्घकालं यावत् आसम् । अतः कांश्चन मयूरान् अत्र वासाय आह्वातुं शक्नुयाम्''इति।

''तथैव भवतु। बहवः मयूराः अत्र दृष्टाः चेत् भूस्वामी नितरां सन्तुष्टः भवेत्'' इति अवदत् अन्नपूर्णा।

भोजनानन्तरं बालः गृहस्य पृष्ठभागं गत्वा मुखेन मयूरध्वनिं कृतवान् । तस्य श्रवणात् उत्तरभागतः केचन मयूराः तत्र आगताः ते तत्र एव वासम् आरब्धवन्तः। अल्पे एव काले स च प्रदेशः मयूराणां वासभूमिः जाता।

एतत् दृष्ट्वा अन्नपूर्णा भूस्वामी च नितरां सन्तुष्टौ जातौ।

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **सारिका** | मैना | a starling |
| **सारूप्यम्** | समानता | resemblance |
| **सार्थिकः** | व्यापारी | merchant |
| **सार्द्र** | गीला | wet |
| **सार्धम्** | साथ में | together with |
| **सार्वकालिकः** | सदा रहने वाला | eternal |
| **सार्वजनिकः** | सर्वसाधारण विषयक | relating to public |
| **सार्वभौम** | विश्वव्यापी | universal |
| **सावलेपः** | घमंडी | proud |
| **सायूयः** | ईर्षालु | envious |
| **साहचर्यम्** | साथ | companionship |
| **साहसिकः** | हिम्मती | bold |
| **साहाय्यम्** | सहायता | assistance |
| **सिकता** | रेत | sand |
| **सिक्त** | सिंचा हुआ | watered |

## किं भवन्तः जानन्ति ?

**१ ) काव्यालङ्कारग्रन्थस्य लेखकः कः आसीत् ?**

(क) भासः (ख) भारविः (ग) भामहः (घ) भानुदत्तः

**२ ) 'चारुदत्त' इति नाटकस्य रचना केन कृतास्ति ?**

(क) क्षेमेन्द्रेण (ख) राजशेखरेण (ग) भासेन (घ) अश्वघोषेण

**३ ) भामिनीविलासग्रन्थस्य रचयिता कः वर्तते ?**

(क) भतृहरिः (ख) कालिदासः (ग) जगन्नाथः (घ) भवभूतिः

**४ ) श्रीमद्भागवतपुराणस्य रचयिता कः वर्तते ?**

(क) तुलसीदासः (ख) वेदव्यासः (ग) याज्ञवल्क्यः (घ) मनुः

**५ ) रसतरङ्गिण्याः रचयिता कः वर्तते ?**

(क) बाणभट्टः (ख) जयदेवः (ग) भानुदत्तः (घ) श्रीहर्षः

**६ ) उरुभङ्गस्य रचयिता कः वर्तते ?**

(क) भासः (ख) पतञ्जलिः (ग) वात्स्यायनः (घ) लक्ष्मीधरभट्टः

**७ ) प्रतिमानाटकस्य रचयिता कः वर्तते ?**

(क) कालिदासः (ख) भासः (ग) भवभूतिः (घ) शूद्रकः

उत्तराणि – (१) ग (२) ग (३) ग (४) ख (५) ग (६) क (९) ख

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Online

## संस्कृत-सम्भाषण-वर्गः

(द्वितीयः स्तरः)

**Date :** 02/06/20 to 29/08/20
**Day :** Tue-Thu-Sat
**Time :** 6:30 pm to 8:00 pm
**Fees :** 4000/-

- **Venue :** Eklavya Sanskrit Academy
Core House, Nr Parimal Garden,
Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

## Admission Open

**Value Education Through Sanskrit**

## बालसंस्कारकेन्द्रम्

**(Class SKg to 4)**

## बालसंस्कृतवर्गः

**(Class 5 to 8)**

**Date** : 13/06/20 to 10/04/21
**Day** : Saturday
**Time** : 5.30pm to 7.00pm
**Fees** : 5000/-

- **Venue :** Eklavya Sanskrit Academy
Core House, , Nr Parimal Garden,
Ellisbridge Ahmedabad
- **Contact:** Dr. Mihir Upadhyay,
Mobile: 98246 16237

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
॥ जयतु संस्कृतं जयतु भारतम् ॥

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006